
# लक्ष्यप्राप्तिः

## (विधिलिङ्)

कदाचित् मण्डूककुले काचित् स्पर्धा आयोजिता । यः स्तम्भस्य शिखरं सर्वादौ प्राप्नुयात् सः विजयी **भवेत्** इति सर्वे मण्डूकाः निर्णीतवन्तः ।

स्पर्धायां भागं नेतुं बहवो मण्डूकाः अग्रे आगतवन्तः । स्पर्धां द्रष्टुम् अपि असंख्याः मण्डूकाः तत्र सम्मिलिताः । स्पर्धा आरब्धा । मण्डूकाः स्तम्भस्य आरोहणं कृतवन्तः । दर्शकाः मण्डूकाः करताडनेन 'अरे !' 'अहो !' 'हो !' इत्यादिभिः शब्दैः स्पर्धार्थिनाम् उत्साहं वर्धयन्ति स्म । स्तम्भः अत्युच्चः आसीत् । कतिपयाः मण्डूकाः चिन्तयन्ति 'को वा स्तम्भस्य आरोहणं **कुर्यात्** ?' स्तम्भः चिक्कणः अस्ति, यः अग्रे **गच्छेत्** सः नूनम् अधः **पतेत्** ।

तथापि कतिपयाः आरोहणाय यत्नं कृतवन्तः, परन्तु अन्येषां मण्डूकानां उत्साहरहितं वचनं श्रुत्वा अधः पतितवन्तः । येषां मनोबलं दृढम् अस्ति ते पुनरपि आरोहणं कुर्वन्ति । तथापि कोऽपि मण्डूकः स्तम्भस्य पादमपि न आरूढवान् । दर्शकाः मण्डूकाः नैराश्यं प्राप्तवन्तः ।



एका मण्डूकमाता स्वलघुपुत्रम् उक्तवती- 'पुत्र ! त्वं स्तम्भस्य आरोहणं **कुर्याः** । आरोहणसमये कस्यापि वचनं न **शृणुयाः** । बधिरत्वं **प्राप्नुयाः** । नूनं सफलः **भवेः** । मातुः वचनेन पुत्रः स्तम्भस्य आरोहणाय अग्रे आगच्छत् । अल्पे एव काले सः शिशुः स्तम्भस्य मध्यभागं प्राप्तवान् । तस्य आरोहणं दृष्ट्वा अन्ये- 'अये ! **पतेः** त्वम् । भोः ! किमर्थम् एतत् साहसं भवतः ? भवतः प्रयासः व्यर्थः' इत्यादीनि वचनानि मण्डूकानां मुखात् निर्गतानि । तथापि सः शिशुः निरन्तरम् अग्रे अगच्छत् । अन्ततः गत्वा सः स्तम्भस्य अग्रभागम् अपि प्राप्तवान् ।

एतद् दृष्ट्वा सर्वे स्तब्धाः अभवन् । ''कथम् एषः शिशुः स्तम्भम् आरोढुं शक्तः ''इति परस्परम् अवदन् ।'' केनचित् पृष्टः सः शिशुः अवदत् 'मातुः वचनानुसारम् अहं मनसि लक्ष्यं निधाय अग्रे आरूढ़वान् । आरोहणकाले बधिरः **भवेयम्** । कस्यापि बचनं न **शृणुयाम्**'' इति निर्णीतवान् । अन्ये च तादृशानि वचनानि श्रुत्वा पराजयं प्राप्तवन्तः । लक्ष्यैकदृष्टिः, एकाग्रता, निरन्तरं प्रयत्नः च मम साफल्यस्य कारणम् इति ।

अत: साधूक्तम्-लक्ष्यपथे नैराश्यपूर्णानां वचनानां विषये कर्णपात: न करणीय: ।

**मण्डूका:, स्पर्धा, दर्शका:, करताडनेन, चिक्कण:, अध:, नैराश्यम्, निरन्तरम्, स्तब्धा:, आरोढुम्**

## टिप्पणी

**शब्दार्थ: -**

स्पर्धा - प्रतियोगिता (ପ୍ରତିଯୋଗିତା), शिखरम् - अग्रम् (ଅଗ୍ରଭାଗକୁ), चिक्कण: - मसृण: (ଚିକଣିଆ), पादम् - मूलभागम् (ମୂଳଭାଗ), स्तब्धा: - जडीभूता: (ଚକିତ) ।

## अभ्यास :

१. **उच्चै: पठत, लिखत ।**

**विधिलिङ्-लकार:**

| **उदाहरणम्-** | | | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
|---|---|---|---|---|---|
| **एकवचनम्** | **(पठ्)** | - | **स:/सा / बालक: पठेत्** | **त्वं पठे:** | **अहं पठेयम्** |
| | (हस्) | - | ............... | ............... | .............. |
| | (गम्) | - | ............... | ............... | .............. |
| | (भ्रम्) | - | ............... | ............... | .............. |
| | (खेल्) | - | ............... | ............... | .............. |
| | (कृ) | - | ............... | ............... | .............. |
| | (दृश्) | - | ............... | ............... | .............. |
| | (भू) | - | ............... | ............... | .............. |
| | (स्था) | - | ............... | ............... | .............. |
| | (नी) | - | ............... | ............... | .............. |
| **द्विवचनम्** | **पठ्** | - | **तौ/ते/बालकौ पठेताम्** | **युवां-पठेतम्** | **आवां-पठेव** |
| | (हस्) | - | ............... | ............... | .............. |
| | (गम्) | - | ............... | ............... | .............. |
| | (भ्रम्) | - | ............... | ............... | .............. |
| | (खेल्) | - | ............... | ............... | .............. |
| | (कृ) | - | ............... | ............... | .............. |

| | | | | |
|---|---|---|---|---|
| (दृश्) | - | ............... | ............... | ............... |
| (भू) | - | ............... | ............... | ............... |
| (स्था) | - | ............... | ............... | ............... |
| (नी) | - | ............... | ............... | ............... |
| **बहुवचनम्** | - | **ते/ताः/बालकाः पठेयुः** | **यूयं पठेत** | **वयं पठेम** |
| (हस्) | - | ............... | ............... | ............... |
| (गम्) | - | ............... | ............... | ............... |
| (भ्रम्) | - | ............... | ............... | ............... |
| (खेल्) | - | ............... | ............... | ............... |
| (कृ) | - | ............... | ............... | ............... |
| (दृश्) | - | ............... | ............... | ............... |
| (भू) | - | ............... | ............... | ............... |
| (स्था) | - | ............... | ............... | ............... |
| (नी) | - | ............... | ............... | ............... |

२. **उदाहरणानुसारं शून्यस्थानं पूरयत -**

यथा- (क) अहं ग्रामं गच्छेयम् । (गम्-विधिलिङ्)

(ख) भिक्षुकः स्नानं ______________ । (कृ-विधिलिङ्)

(ग) माता भोजनं ______________ । (नी-विधिलिङ्)

(घ) बालकः क्रीडाप्रान्तरे ______________ । (खेल्-विधिलिङ्)

(ङ) शिक्षकः कथां ______________ । (कथ्-विधिलङि्)

३. **बन्धनीमध्यस्थयथार्थपदैः शून्यस्थानानि पूरयत ।**

(क) विद्यालयेषु छात्राः ____________ । (पठेत्, पठेताम्, पठेयुः)

(ख) प्रधानमन्त्री दिल्ल्यां ____________ । (तिष्ठेत्, तिष्ठेताम्, तिष्ठेयुः)

(ग) वानराः अरण्ये ____________ । (क्रीडेत्, क्रीडेताम्, क्रीडेयुः)

(घ) त्वं रन्धनं ____________ । (कुर्याः, कुर्यातम्, कुर्यात)

(ङ) लोकयाने सम्मर्दः ____________ । (भवेत्, भवेताम्, भवेयुः)

४. **उचितैः पदैः शून्यस्थानानि पूरयत ।**

(क) मण्डूकाः ____________ आरोहणं कृतवन्तः ।

(ख) स्तम्भः ____________ आसीत् ।

(ग) पुत्र ! त्वं स्तम्भस्य ____________ कुर्याः ।

(घ) आरोहणसमये कस्यापि वचनं न ____________ ।

(ङ) अये ! ____________ त्वम् ?

५. **मातृभाषया अनुवादं कुरुत ।**

(क) सः शिशुः स्तम्भस्य मध्यभागं प्राप्तवान् ।

(ख) भवतः प्रयासः व्यर्थः ।

(ग) आरोहणसमये कस्यापि वचनं न शृणुयाः ।

(घ) अहं मनसि लक्ष्यं निधाय अग्रे आरूढ़वान् ।

(ङ) कस्यापि वचनं न शृणुयाम् ।

६. **विषयानुसारं स्तम्भमेलनं कुरुत ।**

| **'क' स्तम्भ** | **'ख' स्तम्भ** |
|---|---|
| स्तम्भस्य | कृतवन्तः |
| आरोहणं | शिखरम् |
| मण्डूकाः | वचनम् |
| निराशपूर्णं | चिन्तयन्ति |
| मनोबलं | प्राप्तवन्तः |
| नैराश्यं | दृढम् |

७. **शब्दं रचयत ।**

यथा- वा न् प्रा प्त - प्राप्तवान्

(क) ता र्ग नि नि

(ख) नि न्त र र म्

(ग) काः द र्श

(घ) आ ह ण रो म्

(ङ) स म्मि ताः लि

●